Shri Gajananasharanagati Stava

श्रीगजाननशरणागतिस्तवः

Document Information

Text title : Shri Gajananasharanagati Stava

File name : gajAnanasharaNAgatistavaH.itx

Category : ganesha, stava

Location : doc_ganesha

Author : Harihara Sharma

Proofread by : Narendran Madathil

Description/comments : From Vighneshvara-stuti-manjari 4

Latest update : October 10, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 10, 2026

sanskritdocuments.org

श्रीगजाननशरणागतिस्तवः

श्रीहरिहरशर्मकृतः
ॐ विनायकं नायकमेकमस्य धातारमादिं जगतोऽप्यनादिम् ।
सदाशिवस्यापि शिवं दधानं गजाननं तं शरणं प्रपद्ये ॥ १॥

सत्याद्वयानन्द-घनस्वरूपं वेदान्तवाक्यैरधिगम्यमानम् ।
वाणीश गौरीश रमेश पूज्यं गजाननं तं शरणं प्रपद्ये ॥ २॥

यद्ब्रह्म जिज्ञासितमागमज्ञैः अनेकजन्मार्जित पुण्यपुञ्जैः ।
विवेकवैराग्यशमादियुक्तैः गजाननं तं शरणं प्रपद्ये ॥ ३॥

यतो बभूवेदमचिन्त्यरूपं मायामयं रज्जुभुजङ्गकल्पम् ।
यत्र स्थितं चाप्ययमेति विश्वं गजाननं तं शरणं प्रपद्ये ॥ ४॥

अक्षादिजन्यैरनवाप्यरूपं मानैश्च सर्वान्तरसंस्थितेशम् ।
शास्त्रैकयोनिं भवसिन्धुपोतं गजाननं तं शरणं प्रपद्ये ॥ ५॥

वेदान्तवाक्यान्यखिलानि देवे चिन्मात्ररूपेऽनुगतानि सम्यक् ।
अन्याश्रयाभावतया च यस्मिन् गजाननं तं शरणं प्रपद्ये ॥ ६॥

यं ब्रह्मसूत्रैरखिलैश्च वेदैः तथागमैस्सर्वपुराणवाक्यैः ।
जानन्त्यगस्त्यादि महामुनीन्द्राः गजाननं तं शरणं प्रपद्ये ॥ ७॥

यं ज्येष्ठराजं गणनाथनाथं ब्रह्मादिभिर्ब्रह्मतयानुभूतम् ।
कविं कवीनामुपमानहीनं गजाननं तं शरणं प्रपद्ये ॥ ८॥

उमापुराराततनूजभूतं षडाननज्येष्ठमचिन्त्यशक्तिम् ।
षडूर्मिषड्भावषडीतिशून्यं गजाननं तं शरणं प्रपद्ये ॥ ९॥

गजासुरात्यर्दितदेवसङ्घान् त्रातुं त्रिलोकाञ्च दयापयोधिः ।
दधार माया गजराजरूपं गजाननं तं शरणं प्रपद्ये ॥ १०॥

धात्रादयो विश्वसृजो यमेव समर्चयित्वा सफला भवेयुः ।

कृत्येषु नो चेद् विफलाश्च मूढाः गजाननं तं शरणं प्रपद्ये ॥ ११॥

गोविन्दमुख्यास्त्रिपुरं न जेतुं शक्ता महेशं शरणं प्रपन्नाः ।
हरोऽप्यहंस्तं यदनुग्रहेण गजाननं तं शरणं प्रपद्ये ॥ १२॥

त्रिलोकमाता त्रिपुरारिपत्नी महागणेशं विधिवत्प्रपूज्य ।
भण्डासुरं दैत्यपतिं जघान गजाननं तं शरणं प्रपद्ये ॥ १३॥

वक्राणि विघ्नानि निहन्ति सेवापरस्य तुण्डेन हि वक्रतुण्डः ।
वदन्ति विघ्नेश्वरमागमज्ञाः गजाननं तं शरणं प्रपद्ये ॥ १४॥

पाशेषुचक्रोत्पलबीजपूरगदारुजाव्रीहि विषाण पद्मैः ।
सवल्लभं रत्नघटेन युक्तं गजाननं तं शरणं प्रपद्ये ॥ १५॥

जन्मान्तरानेक कृतानि यन्मे पापान्यथास्मिन् करणैस्त्रिभिश्च ।
तेषां प्रशान्त्यै भवबन्धमुक्त्यै गजाननं तं शरणं प्रपद्ये ॥ १६॥

त्वमेव माता जनको गुरुश्च भ्राता सखा बन्धुजनो महेश ।
दासस्तवाहं भवदंशकश्च त्वमेव चाहं परमार्थ दृष्ट्या ॥ १७॥

त्वामेकदन्तं प्रवदन्ति वेदाः अनेकदं दीनजनानुरक्तम् ।
याचे भवन्तं वरमेकमेव सदा रतिं त्वच्चरणारविन्दे ॥ १८॥

धनं कळत्रं वसुधाधिपत्यं कलानिधित्वं कमनीयगात्रम् ।
याचे न चाहं भगवन्ममैव स्वाभाविकस्वात्मसुखं प्रयच्छ ॥ १९॥

पुराणवेदागमसूत्रवाक्यैः अनाप्तमानस्य महा महिम्नः ।
मद्वाग्विशुद्ध्यै स्तवनं कृतं यत् तद्क्षामये त्वां जगदेकनाथ ॥ २०॥

स्तवं गजाननस्येदं कृतं हरिहरेण यत् ।
तुष्यतां तेन सर्वात्मा सच्चिद्रूपो विनायकः ॥ २१॥

(ब्रह्मसूत्र-चतुःसूत्रीमनुसरति)

इति श्रीहरिहरशर्मकृतः श्रीगजाननशरणागतिस्तवः सम्पूर्णः ।

Proofread by Narendran Madathil

Shri Gajananasharanagati Stava

pdf was typeset on October 10, 2026

Please send corrections to *sanskrit@cheerful.com*